# श्री ललिता त्रिशती पूर्व पीठिका

॥ ॐ महागणपतये नमः ॥

॥ ॐ श्री शंकराचार्यवर्याय नमः ॥

॥ ॐ श्रीमात्रे नमः ॥

## मङ्गळाचरणम्

वन्दे विघ्नेश्वरं देवं सर्वसिद्धि प्रदायिनम्।
वामाङ्करूढ वामाक्षी करपल्लव पूजितम् ॥ १ ॥

पाशाङ्कुशेक्षुसुमराजित पञ्चशाकां
पाटल्यशालिसुषुमांचितगात्रवल्लीम्।
प्राचिनवक्स्तुतपदां परदेवतां त्वं
पञ्चायुधार्चितपदां प्रणमामि देवीम् ॥ २ ॥

लोपामुद्रापतिं नत्वा हयग्रीवमपीश्वरम्।

श्रीविद्या राज संसिद्धि कारि पंकज वीक्षणम् ॥ ३ ॥

## श्री ललिता त्रिशती पूर्व पीठिका

अगस्थ्य उवाच।

हयग्रीव दया सिन्धो भगवन् शिष्य वत्सल।

त्वत्तः श्रुतं अशेषेण श्रोतव्यं यद्यत् अस्ति तत् ॥ १ ॥

रहस्य नाम साहस्रं अपि त्वत्तः श्रुतं मय।

इतः परं मे नास्ति एव श्रोतव्यं इति निश्चयः ॥ २ ॥

तथापि मम चित्तस्य पर्याप्तिर्नैव जायते।

कार्त्स्न्यार्थः प्राप्य इत्येव शोचयिष्याम्यहं प्रभो ॥ ३ ॥

किमिदं कारणं ब्रूहि ज्ञातव्यांशोऽस्ति वा पुनः।

अस्ति चेन्मम तत् ब्रूहि ब्रूहीत्युक्त्वा प्रणम्य तं ॥४ ॥

सूत उवाच।

समालंबे तत्पाद युगळं कलशोद्भवः।

हयाननो भीतभीतः किमिदं किमिदं त्विति ॥ ५ ॥

मुंचमुंचेति तंचोक्त्वा चिन्ताक्रान्तो बभूव सः।

चिरं विचार्य निश्चिन्वन् वक्तव्यं न मयेत्य सौ ॥ ६ ॥

तूष्णीं स्थितः स्मरन्नाज्ञां ललितांबा कृतां पुरा।

तं प्रणम्यैव समुनिः तत्पादावत्यजन् स्थितः ॥ ७ ॥

वर्ष त्रयावधि तथा गुरुशिष्यौ तथा स्थितौ।

तछृंवन् तश्च पश्यंत सर्व लोकाः सुविस्मिताः ॥ ८ ॥

तत्र श्री ललिता देवी कामेश्वर समंविता।

प्रादुर्भूता रहस्येवं हयग्रीवमवोचत ॥ ९ ॥

श्री देवी उवाच।

आश्वानना वयोः प्रीतिः शास्त्र विश्वासिने त्वया।

राज्यं देयं शिरो देयं न देया शोडशाक्षरी ॥ १० ॥

स्वमातृ जारवत् गोप्या विद्या एषः इति अगमा जगुः।

ततो अति गोपनिया मे सर्व-पूर्तिकरी स्तुतिः ॥ ११ ॥

मया कामेश्वरेणापि कृता सा गोपिता भृशम्।

मदाज्ञया वचो देव्यः चकृ नाम सहस्रकम् ॥ १२ ॥

आवाभ्यां कथितं मुख्यं सर्व पूर्तिकरं स्तवं।

सर्व क्रियाणां वैकल्य पूर्तिर्यः जपतो भवेत् ॥ १३ ॥

सर्व पूर्तिकरं तस्मादिदं नाम कृतं मया।

तद्ब्रूहि त्वमगस्त्याय पात्रमेव न संशयः ॥ १४ ॥

पत्न्यस्य लोपामुद्राख्या मामुपास्ते अति भतितः।

अयंच नितरां भक्तः तस्मादस्य वदस्व तम् ॥ १५ ॥

अमुञ्चमानस्त्वद्द्वादौ वर्शत्रयमसौ स्थितः।

एतत् ज्ञातुमतो भक्त्या हितमेव निदर्शनम् ॥ १६ ॥

चित्तपर्याप्तिरेतस्य नान्यथा संभविष्यती।

सर्वपूर्तिकरं तमादनुज्ञातो मया वद ॥ १७ ॥

सूत उवाच।

इति युक्त अन्तरधदाम्बा कामेश्वर समन्विता।

अथोत्थाप्य हयग्रीवः पाणिभ्यां कुम्भसम्भवम् ॥ १८ ॥

संस्थाप्य निकटेवाच उवाच भृश विस्मितः।

हयग्रीव उवाच।

कृतार्थोऽसि कृतार्थोऽसि कृतार्थोऽसि घटोद्भव ॥ १९ ॥

त्वत्समो ललिताभक्तो नास्ति नास्ति जगत्त्रये।

एनागस्त्य स्वयं देवी तववक्तव्यं अन्वशात् ॥ २० ॥

सच्छिष्येन त्वय चाहं दृष्ट्वानस्मि तां शिवां।

यतन्ते यद्दर्शनाय ब्रह्मविष्ण्वीश पूर्विका ॥ २१ ॥

अथः परं ते वक्ष्यामि सर्वपूर्तिकरं स्थवम्।

यस्य स्मरण मात्रेण पर्याप्तिस्ते भव्हृदे ॥ २२ ॥

रहस्यनाम साहस्रादपि गुह्यतमं मुने।

आवश्यकं ततोऽपियेतल्ललितां समुपासितुम् ॥ २३ ॥

तदहं संप्रवक्ष्यामि ललिताम्बा अनुशासनात्।

श्रीमत्पञ्चदशाक्षर्याः कादिवर्णान् क्रामन् मुने ॥ २४ ॥

पृथग्विंशति नामानि कथितानि घटोद्भव।

आहृत्य नाम्नां त्रिशती सर्वस्ंपूर्ति कारणी ॥ २५ ॥

रहस्यादि रहस्यैषा गोपनीय प्रयत्नतः।

तां शृणुष्व महाभाग सावधानेन चेतस ॥ २६ ॥

मन्त्रात्मकं एतेषां नाम्नां नामत्मतापि च।

तस्मात् एकाग्रमनस श्रोतव्य च त्वया सदा ॥ २७ ॥

सूत उवाच ।

इति युक्त तं हयग्रीवः प्रोचे नामशतत्रयम् ॥ २८ ॥

॥ इति श्री ललिता त्रिशती स्तोत्र पूर्व भागः ॥